309sk16

# 16

# मानो हि महतां धनम्

किं भवद्भिः महाभारतस्य नाम श्रुतम्? तस्मिन् ग्रन्थे न केवलं कौरव–पाण्डवानाम् एव युद्धं वर्णितम् अपितु असंख्याः कथाः तत्र दत्ताः, याभ्यः अमूल्याः शिक्षाः प्राप्यन्ते। लोभः समस्तानां व्याधीनां मूलम्। अस्यां पद्यमय्यां कथायाम् कथम् एकः शृगालः दुष्टानां कथनेन विमूढराज्ञा सिंहेन पूर्वम् अपमानितः पश्चात् च यद्यपि सम्मानितः तथापि सचिवपदं त्यक्त्वा वनं प्रविशति। नूनं मानो हि महतां धनम्। अस्मिन् पाठे वयं एतस्य विषये पठिष्यामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- व्याघ्रगोमायुकथां स्वशब्दैः वर्णयितुं समर्थः भविष्यति;
- महाभारतस्य सामान्यं परिचयं पञ्चवाक्येषु लेखितुं शक्तः भविष्यति;
- शृगालस्य व्याघ्रस्य चारित्रिकवैशिष्ट्यं विशदीकरिष्यति;
- शृगालस्य पदत्यागकारणानि विवेचयितुं क्षमः भविष्यति;
- कर्मवाच्यवाक्यानि कर्तृवाच्ये परिवर्तयिष्यति;
- द्वन्द्वबहुव्रीहिसमस्तपदानां विग्रहं प्रदर्शयितुं सक्षमः भविष्यति;
- 'सर्व' सर्वनामशब्दस्य त्रिषु लिङ्गेषु रूपाणि लेखिष्यति;
- पाठे प्रयुक्तानां सूक्तीनां चयनं करिष्यति।







## क्रियाकलापः

अधः "क" स्तम्भे केषाञ्चित् स्वाभिमानयुक्तानां जनानां चित्राणि दत्तानि। "ख" स्तम्भे च तैः कृतानां बलिदानानां कर्मणां वर्णनम्। उपयुक्तनामभिः सह सम्बद्धवर्णनं योजयन्तु

**"क" स्तम्भः**



16.1



16.2



16.3



16.4



16.5



16.6

**"ख" स्तम्भः**

(1) स्वतन्त्रताप्राप्तेः अनन्तरं पदग्रहणात् विरक्तिः।

(2) बमविस्फोटकारणात् प्राणदण्डः।

(3) स्वंतन्त्रताकृते आंग्लैः सह युद्धम्।

(4) 'केसरी' पत्रमाध्यनेन आंग्लविरोधात् कारावासः।

(5) आई सी एस उपाधेः प्रत्यावर्तनम्।

(6) विषदातारं प्रति क्षमा।

स्वाभिमानिनः जनाः सुखानि त्यजन्ति, पदं त्यजन्ति परन्तु अपमानं न सहन्ते। मानो हि महतां धनम्।

## 16.1 मूलपाठः

### मानो हि महतां धनम्

सम्प्रति मूलपाठं ध्यानेन पठामः

पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः ।
परहिंसारतिः क्रूरो बभूव पुरुषाधमः ।।1।।

स त्वायुषि परिक्षीणे जगामानीप्सितां गतिम्।
गोमायुत्वं च सम्प्राप्तो दूषितः पूर्वकर्मणा।।2।।

संस्मृत्य पूर्वभूतिं च निर्वेदं परमं गतः।
न भक्षयति मांसानि परैरुपहृतान्यपि।।3।।

अहिंस्रः सर्वभूतेषु सत्यवाक् सुदृढव्रतः।
स चकार यथाकालमाहारं पतितैः फलैः।।4।।

तं शुचिं पण्डितं मत्वा शार्दूलः ख्यातविक्रमः ।
कृत्वाऽत्मसदृशीं पूजां साचिव्येऽवरयत् स्वयम्।।5।।

तं तथा सुकृतं दृष्ट्वा पूज्यमानं स्वकर्मसु।
प्राद्विषन् कृतसंघाताः पूर्वभृत्याः मुहुर्मुहुः।।6।।

अन्यथा ह्युषिताः पूर्वं परद्रव्याभिहारिणः।
अशक्ता किंचिदादातुं द्रव्यं गोमायुयन्त्रिताः।।7।।

ईप्सितं तु मृगेन्द्रस्य मांसं यत् यत्र संस्कृतम्।
अपनीय स्वयं तद्धि तैर्न्यस्तं तस्य वेश्मनि।।8।।

मृगराजेन चाज्ञप्तं दृश्यतां चोर इत्युत।
कृतकैश्चापि तन्मांसं मृगेन्द्रायोपवर्णितम्।।9।।

सचिवेनापनीतं ते विदुषा प्राज्ञमानिना।
सरोषस्त्वथ शार्दूलः श्रुत्वा गोमायुचापलम्।।10।।

आज्ञापयामास तदा गोमायुर्वध्यतामिति।
शार्दूलस्य वचः श्रुत्वा शार्दूलजननी ततः।।11।

मृगराजं हितैर्वाक्यैः सम्बोधयितुमागमत्।
पुत्र, नैतत् त्वया ग्राह्यं कपटारम्भसंयुतम्।।12।।

**शब्दार्थाः**
श्रीमत्यां = वैभवशालिनी (में)
पुरिकायां पुरि = 'पुरिका' नामक नगरी में
पौरिकः = राजा का नाम, बभूव = हुआ।
आयुषि परिक्षीणे = आयु समाप्त होने पर,
अनीप्सितां = न चाही गई,
जगाम = प्राप्त हुआ।
गोमायुत्वं = श्रृगाल की योनि को
पूर्वभूतिं = पूर्वजन्म के वैभव को,
परमं निर्वेदं = परम वैराग्य को
परैः = दूसरों के द्वारा
उपहृतानि = मेरे किये गये
सर्वभूतेषु = सभी प्राणियों पर
अहिस्रः = हिंसा न करने वाला,
यथाकालम् = समयानुसार,
चकार = करता था, ख्यातविक्रमः = प्रसिद्ध पराक्रम वाला, शार्दूलः = बाघ
आत्मसदृशीं = अपने पद के अनुरूप
साचिव्ये = मन्त्री पद पर
सुकृतं = श्रेष्ठ कर्म करने वाले को
कृतसंघाताः = मिले हुए
परद्रव्याभिहारिणः = दूसरों के धन को चुराने वाले, अन्यथा उचित और ढंग से रहने वाले
ईप्सितं = मनपसन्द, अपनीय = ले जाकर
वेश्मनि = घर में, न्यस्तम्= रख दिया गया
कृतकैः = दूषित कार्य करने वालों के द्वारा
उपवर्णितः = कहा गया
अपनीतं = चुराया गया है
प्राज्ञमानिना = बुद्धिमान के द्वारा
सरोषः = क्रोध से भरे हुए (बाघ ने)
वध्यताम् = मार दिया जाय
सम्बोधयितुम् = समझाने के लिये
आगमत् = आई
कपटारम्भसंयुतम् = कपट–पूर्ण षडयन्त्र से युक्त, ग्राह्यं = स्वीकार करना चाहिये।

दूषितं परदोषैर्हि गृह्णीते योऽन्यथा शुचिम्।
स्वयं सन्दूषितामात्यः क्षिप्रमेव विनश्यति।।13।।

तस्मादप्यरिसंघाताद् गोमायोः कश्चिदागतः।
धर्मात्मा तेन चाख्यातं यथैतत् कपटं कृतम्।।14।

ततो विज्ञातचरितः सत्कृत्य स विमोक्षितः।
परिष्वक्तश्च सस्नेहं मृगेन्द्रेण पुनः पुनः।।15।।

तं स गोमायुरालोक्य स्नेहादागतसम्भ्रमम्।
उवाच प्रणतो वाक्यं बाष्पगद्गदया गिरा।।16।।

दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते।
भिन्ना श्लिष्टा तु या मैत्री न सा स्नेहेन वर्तते।।17।।

कश्चिदेव हिते भर्तुर्दृश्यते न परात्मनोः।
कार्यापेक्षाः हि वर्तन्ते भावस्निग्धाः सुदुर्लभाः।।18।।

एवंविधं सान्त्वमुक्त्वा धर्मकामार्थहेतुमत्।
प्रसादयित्वा राजानं गोमायुर्वनमभ्यगात्।।19।

परदोषैः = दूसरों के दोषों से दूषित, परन्तु अन्यथा शुचिम् = वास्तव में पवित्र को, सन्दूषितामात्यः= दुष्ट अमात्यों वाला (राजा), क्षिप्रम् = शीघ्र
गोमायोः = शृगाल के, अरिसंघातात् = दुश्मनों के गिरोह से,, आख्यातम्= बता दिया गया, विज्ञातचरितः = सच्चरित्रता को जान लेने वाले, विमोक्षितः = छोड़ दिया गया, परिष्वक्तः = आलिंगित किया गया, स्नेहगतसम्भ्रमम् = स्नेह से व्याकुल चित्त वाले (बाघ को), प्रणतः = झुके हुए बाष्प=आंसुओं से गदग्द वाणी से
उवाच = कहा, भिन्नं = टूटा हुआ दिल श्लिष्यते = जुड़ता है, श्लिष्टं = जुडा हुआ, भिद्यते = टूटता है
भिन्ना श्लिष्टा = पग पग पर जुड़ने और टूटने वाली मित्रता, स्नेहेन = स्नेह से परिपूर्ण, भर्तुः = स्वामी के, हिते = हित में, दृश्यते = दिखाई देता है,
न परात्मनोः = अपने और पराये हित में नहीं, कार्यापेक्षाः = स्वार्थी, मतलबी
भावस्निग्धाः = शुद्ध भाव वाले स्नेही
सान्त्वं = सान्त्वनायुक्त
धर्मकामार्थहेतुकम् = धर्म अर्थ काम और युक्तियों से युक्त, हितकर
प्रसादयित्वा = प्रसन्न करके
वनम् = वन को
अभ्यगात् = चला गया।

## 16.2 बोधप्रश्नाः

1. विशेषणैः सह विशेष्यपदानि योजयन्तु

| "क" स्तम्भ | "ख" स्तम्भ |
|---|---|
| (क) पतितैः | (1) वाक्यैः |
| (ख) हितैः | (2) पूजाम् |
| (ग) श्रीमत्यां | (3) सचिवेन |
| (घ) आत्मसदृशीम् | (4) फलैः |
| (ङ) कृतसंघाताः | (5) पुरि |
| (च) प्राज्ञमानिना | (6) पूर्वभृत्याः |

2. श्लोकांशान् योजयन्तु

| "क" | "ख" |
|---|---|
| (क) परहिंसारति : क्रूरः | (1) दृश्यतां चोर इत्युत। |
| (ख) कृत्वात्मसदृशीं पूजाम् | (2) श्लिष्टं दुःखेन भिद्यते। |







| | |
|---|---|
| (ग) मृगराजेन चाज्ञप्तम् | (3) साचिव्येऽवरयत् स्वयम्। |
| (घ) आज्ञापयामास तदा | (4) बभूव पुरुषाधमः। |
| (ङ) दुःखेन श्लिष्यते भिन्नं | (5) गोमायुर्वनमभ्यगात्। |
| (च) प्रसादयित्वा राजानम् | (6) गोमायुर्वध्यताम् इति। |

3. निम्नलिखितेषु विकल्पेषु शुद्धं विकल्पम् (✓) इति चिह्नेन चिह्नीकुर्वन्तु
   (क) पौरिकः नृपः (पुरिकायाम्/मथुरायाम्) अवसत्।
   (ख) श्रृगालः केवलं (मांसम्/पतितानि फलानि) भक्षयति स्म।
   (ग) शार्दूलः श्रृगालाय (सचिवपदम्/सेवकपदम्) अयच्छत्।
   (घ) दुष्टैः कर्मचारिभिः मृगेन्द्रस्य (धनम्/ईप्सितम् अन्नम्)।
   (ङ) श्रृगालः सचिवपदं त्यक्त्वा (नगरं/वनं) प्रति अचलत्।

---

## 16.3 अधुना अवगच्छामः

### प्रथमः अंशः

पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः।
परहिंसारतिः क्रूरो बभूव पुरुषाधमः।।1।।

**श्लोकः 1**

सम्प्रति वयं अत्र प्रथमं श्लोकं पठामः बोधामः च।

**पदच्छेदः** पुरिकायाम् पुरि पुरा श्रीमत्याम् पौरिकः नृपः।
परहिंसारतिः क्रूरः बभूव पुरुषाधमः।।

**अन्वयः** पुरा श्रीमत्याम् पुरिकायाम् पुरि परहिंसारतिः क्रूरः पुरुषाधमः पौरिकः नृपः बभूव।

**व्याख्या**

नृपः कः अभवत्? एकः पौरिकः नाम नृपः अभवत्।

सः कुत्र अभवत् ? 'पुरिकायां पुरि'–पुरिका इति नगर्याम्।

श्रीमत्यां = शोभायुक्तायाम् अर्थात् सा नगरी शोभायुक्ता आसीत्।

परहिंसारतिः = परेषां हिंसायां रतिः यस्य सः अर्थात् हिंसकः।

क्रूरः = अत्याचारी, निर्दयः

पुरुषाधमः = पुरुषेषु अधमः, अत्यन्तनीचः

**भावार्थः**

प्राचीनकाले एका शोभायुक्ता 'पुरिका' नाम नगरी आसीत्। तस्यां नगर्यां एकः राजा आसीत्। तस्य नाम पौरिकः आसीत्। सः राजा अतीव क्रूरः = निर्दयः। परेषां हिंसायाम् रतः पुरुषेषु अधमः इव आसीत्।





'पुरिका' नामक नगरी में प्राचीन काल में एक पौरिक नाम का अत्यन्त क्रूर निर्दयी हिंसक प्रकृति वाला राजा हुआ।

## व्याकरणबिन्दवः

| | | मूलशब्दाः |
|---|---|---|
| सप्तम्यन्तपदानि | श्रीमत्यां | (श्रीमती) |
| | पुरिकायां | (पुरिका) |
| | पुरि | (पूर्) |
| प्रथमान्तपदानि | नृपः | (नृप) |
| | परहिंसारतिः | (परहिंसारति) |
| | क्रूरः | (क्रूर) |
| | पुरुषाधमः | (पुरुषाधम) |

सप्तम्यन्तपदानि 'पुरिका' इति नगर्याः विशेषणानि। प्रथमान्तपदानि नृपस्य विशेषणानि।

(विशेषणस्य लिङ्ग वचनं विभक्तिश्च विशेष्यवत् भवन्ति।)

**श्लोकः 2**

स त्वायुषि परिक्षीणे
जगाम अनीप्सितां गतिम्।
गोमायुत्वं च सम्प्राप्तो
दूषितः पूर्वकर्मणा।।2।।

**पदच्छेदः** सः तु आयुषि परिक्षीणे जगाम अनीप्सिताम् गतिम्।
गोमायुत्वम् च सम्प्राप्तः दूषितः पूर्वकर्मणा।।

**अन्वयः** सः तु परिक्षीणे आयुषि अनीप्सिताम् गतिम् जगाम। पूर्वकर्मणा दूषितः गोमायुत्वम् च संप्राप्तः।

**व्याख्या**

आयुषि परिक्षीणे = मृत्युंगते सति

पौरिकः अग्रिमे जन्मनि कः अभवत्? सः राजा अनीप्सितां अवांछितां गतिं प्राप्तवान्।

सः राजा अग्रिमे जन्मनि कां योनिं प्राप्तवान्? गोमायुत्वम् = शृगालस्य योनिम्। यतः सः राजा पूर्वजन्मनः कर्मणः दूषितः आसीत्। अर्थात् पौरिकः यदा राजा आसीत् तदा सः हिंसाकर्मणि रतः आसीत्।

## भावार्थः

राजा पूर्वजन्मनि हिंसां कृतवान्, प्राणिनां वधम् अकरोत्। नीचकार्याणि अकरोत् अतः सः राजा पूर्वकर्मप्रभावेन अन्यस्मिन् जन्मनि शृगालः अभवत्।

पूर्वजन्म के कर्मों का फल सभी को भोगना पड़ता है। पौरिक राजा भी अपने बुरे कर्मों के कारण दूसरे जन्म में श्रृगाल बन गया जो पशु हिंसा करके अपना पेट पालता है।

## व्याकरणबिन्दवः

| | |
|---|---|
| आयुषि परिक्षीणे | भावे सप्तमी, यदा आयुः समाप्ता। |
| अनीप्सितां | न ईप्सितां– अवांछितां, (नञ् तत्पुरुष) |
| दूषित | दुष् + णिच् + क्त + – दुष्टः –दूषितः (प्रेरणार्थकक्रिया) |
| गोमायुत्वं | गोमायु+त्व– गोमायोः भावः (जन्म) |

**श्लोकः 3**

संस्मृत्य पूर्वभूतिं च
निर्वेदं परमं गतः।
न भक्षयति मांसानि,
परैरुपहृतान्यपि।।3।।

**पदच्छेदः** संस्मृत्य पूर्वभूतिम् च निर्वेदम् परमम् गतः।
न भक्षयति मांसानि परैः उपहृतान्यपि।।

**अन्वयः** पूर्वभूतिम् च संस्मृत्य परमम् निर्वेदम् गतः (सः) परैः उपहृतानि अपि मांसानि न भक्षयति।

**व्याख्या**

सः गोमायुः इह जन्मनि परमं निर्वेदं वैराग्यं प्राप्तवान्।

सः पूर्वभूतिं संस्मृत्य पूर्वजन्मकर्माणि स्मृत्वा वैराग्यं गतः।

सः गोमायुः पूर्वजन्म स्मृत्वा अस्मिन् जन्मनि मांसानि न भक्षयति। परैः उपहृतानि, अन्यैः आनीतानि अपि च।

**भावार्थः**

सः श्रृगालः पूर्वजन्म स्मृत्वा वैराग्यं प्राप्तवान्। सः अन्यैः आनीतानि मांसानि अपि न भक्षयति।

वह राजा अगले जन्म में गीदड़ बन गया परन्तु उसे पूर्वजन्म के अपने अत्याचार और हिंसा के कार्य याद रहे और परिणामस्वरूप उसने स्वयं हिंसा करना तो दूर, औरों द्वारा भेंट किये गये मांस को भी खाना स्वीकार नहीं किया।

## व्याकरणबिन्दवः

| | |
|---|---|
| पूर्वभूतिं | = (पूर्वजन्म को) द्वितीया एकवचनम् |
| संस्मृत्य | = सम् स्मृ ल्यप् = स्मृत्वा |

परमं निर्वेदं—परमं वैराग्यम्

| | |
|---|---|
| परैः | = अन्यैः (तृतीया बहुवचनम्) |
| उपहृतानि | = उप + हृ + क्त नपुं. द्वितीया बहुवचनम् |
| परमं निर्वेदम् | = परमं विशेषणम्,निर्वेदम् = वैराग्यम् |
| उपहृतानि मांसानि | = उपहृतानि विशेषणम्, मांसानि–विशेष्यम् |

**श्लोकः 4**

**पदच्छेदः** अहिस्रः सर्वभूतेषुसत्यवाक् सुदृढ़व्रतः।
सः चकार यथाकालम् आहारम् पतितैः फलैः।।

**अन्वयः** सर्वभूतेषु अहिंस्रः सत्यवाक् सुदृढ़व्रतः सः यथाकालम् पतितैः फलैः आहारम् चकार।

गोमायोः जीवनचर्या कीदृशी जाता? इति अत्र बोधामः।

अहिस्रः सर्वभूतेषु
सत्यवाक् सुदृढव्रतः।
स चकार यथाकालमाहारं
पतितैः फलैः।।4।।

**व्याख्या**

अहिंस्रः यः हिंसां न करोति सः। सत्यवाक् = सत्या वाक् यस्य सः सत्यवादी।

सः गोमायुः पतितैः फलैः आहारम् चकार = अकरोत्। अर्थात् यानि फलानि उचितकाले एव पतन्ति।

**भावार्थः**

सः गोमायुः कमपि न अमारयत्। सर्वदा सत्यम् अवदत्, तस्य व्रतं सुदृढमासीत्। यः समयानुसारं स्वयं पतितैः फलैः एव भोजनम् अकरोत्।

वह श्रृगाल पूर्व जन्म के पापों को याद करके अब प्राणियों पर हिंसा नहीं करता था, सत्य बोलता था, पक्के इरादे वाला था, और समयानुसार स्वयं गिरे हुए फलों से ही अपना भोजन करता था।

## व्याकरणबिन्दवः

| | | |
|---|---|---|
| अहिंस्रः | = न हिंस्रः | नञ् तत्पुरुषः |
| सत्यवाक् | = सत्या वाक् यस्य सः = सत्यवाक् = | (बहुव्रीहिः) |
| सुदृढव्रतः | = सुदृढं व्रतं यस्य सः = सुदृढव्रतः = | (बहुव्रीहिः) |
| यथाकालम् | = कालम् अनतिक्रम्य समयानुसारम् = | (अव्ययीभावः) |
| पतितैः फलैः | = पतितैः (विशेषणम्) फलैः–(विशेष्यम्) | (कर्मधारयः) |



टिप्पणी

तं शुचिं पण्डितं मत्वा
शार्दूलः ख्यातविक्रमः।
कृत्वात्मसदृशीं पूजां
साचिव्येऽवरयत् स्वयम्।।5।।

**श्लोकः 5**

**पदच्छेदः** तम् शुचिम् पण्डितम् मत्वा शार्दूलः ख्यातविक्रमः।
कृत्वा आत्मसदृशीम् पूजाम् साचिव्ये अवरयत् स्वयम्।।

**अन्वयः** ख्यातविक्रमः शार्दूलः तम् शुचिम् पण्डितम् मत्वा आत्मसदृशीम् पूजाम् कृत्वा स्वयम् साचिव्ये अवरयत्।

शार्दूलेन गोमायुः कथं सम्मानितः इति वयम् अत्र पठामः।

**व्याख्या**

शार्दूलः ख्यातविक्रमः = यस्य विक्रमः पराक्रमः प्रसिद्धः सः एवम्भूतः आसीत्।

शार्दूलः गोमायुं किं मत्वा अवरयत्? (1) शुचिं=पवित्रम् (2) पण्डितं= विद्वांसम् च। शार्दूलः श्रृगालं सचिवस्य पदे अवरयत्। सः तस्य वरणे आत्मसदृशीं पूजां कृतवान्।

**भावार्थः**

वीरः व्याघ्रः श्रृगालं पवित्रं विद्वांसं मत्वा तस्य नृपतुल्यपूजादिकं कृत्वा = सम्मानादिकं कृत्वा तं सचिवपदाय अवरयत्।

बहुत ही वीर व्याघ्र ने श्रृगाल को पवित्र और विद्वान समझकर उसका अपने पद के योग्य पूजा, सम्मान करके सचिव पद के लिये स्वयं ही चुन लिया।

## व्याकरणबिन्दवः

| | |
|---|---|
| ख्यातविक्रमः | ख्यातः विक्रमः यस्य सः (बहुव्रीहिः) |
| मत्वा | मन् + क्त्वा = विचारयित्वा |
| कृत्वा | कृ + क्त्वा = सम्पादयित्वा |
| आत्मसदृशीं | विशेषणं, पूजां = विशेष्यम् |
| साचिव्ये + अवरयत् | पूर्वरूपसन्धिः अ – ऽ (अवग्रहः) |
| अवरयत् | वृ + णिच् लङ् प्रथमपुरुषे एकवचनम् |

**श्लोकः 6**

**पदच्छेदः** तम् तथा सुकृतम् मत्वा पूज्यमानम् स्वकर्मसु।
प्राद्विषन् कृतसंघाताः पूर्वभृत्याः मुहुः मुहुः।।

तं तथा सुकृतं मत्वा
पूज्यमानं स्वकर्मसु।
प्राद्विषन् कृतसंघाताः
पूर्वभृत्याः मुहुर्मुहुः।।6।।

**अन्वयः** तम् तथा सुकृतम् स्वकर्मसु मुहुः मुहुः पूज्यमानम् मत्वा कृतसंघाताः पूर्वभृत्याः प्राद्विषन्।

अस्मिन् पद्ये व्याघ्रस्य पूर्वसेवकाः श्रृगालं प्रति कथं द्वेषं कृतवन्तः इति अत्र बोधामः।





**व्याख्या**

श्रृगालं प्रति पूर्वभृत्याः ये व्याघ्रस्य पूर्वसेवकाः आसन् ते, कृतसंघाताः कृतः संघातः (मैत्री) यैः ते, पूर्वसेवकाः मुहुर्मुहुः प्राद्विषन् = पूर्वसेवकाः पुनः पुनः द्वेषम् अकुर्वन्। पूर्वसेवकाः गोमायुं सुकृतं मत्वा प्राद्विषन्। ते पूर्वसेवकाः गोमायुं स्वकर्मसु पूज्यमानं मत्वा प्राद्विषन्।

**भावार्थः**

मित्रताम् उपगताः व्याघ्रस्य पूर्वे सेवकाः श्रृगालं शुभकर्मयुक्तं स्वकार्यदक्षतार्थं वारम्वारं वन्द्यमानं दृष्ट्वा द्वेषम् अकुर्वन्।

व्याघ्र ने श्रृगाल को मन्त्री बना लिया। वह अपने कर्मों से पूजा जाने लगा। व्याघ्र के पुराने मन्त्रिगण मिलकर बारबार उस गीदड़ की पूजा होते हुए देखकर उससे द्वेष करने लगे।

## व्याकरणबिन्दवः

| | |
|---|---|
| कृतसंघाताः | कृतः संघातः यैः ते (बहुव्रीहिः) |
| मुहुः मुहुः | पुनः पुनः (अव्ययम्) |
| सुकृतं | सुष्ठ कृतं कर्म यस्य तं सुकृतम् (बहुव्रीहिः) |
| पूज्यमानम् | पूज् + कर्मवाच्य+शानच्+द्वितीया एकवचनम् |
| प्राद्विषन् | प्र + द्विष् + लङ् + प्रथम पु. बहुवचनम् |

## पाठगतप्रश्नाः 16.1

1. एकपदेन उत्तरत
   (क) श्रृगालं किं स्मृत्वा वैराग्यं प्राप्तवान्?
   (ख) पुरिका नगरी कीदृशी आसीत्?
   (ग) पौरिकः कीदृशैः कर्मभिः श्रृगालयोनिम् प्राप्तवान्?
   (घ) कः गोमायुं सचिवपदे नियुक्तम् अकरोत्?
   (ङ) किं व्रतं श्रृगालः पालयन् फलानि एव भक्षयति स्म?
   (च) कीदृशाः पूर्वभृत्याः तस्मै द्वेषम् अकुर्वन्?

2. उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु
   (क) श्रीमत्यां पुरिकायां ........................................ नृपः आसीत्।

(i) अशोकः (ii) विक्रमादित्यः
(iii) पौरिकः (iv) भोजः

(ख) पूर्वकर्मप्रभावेन अन्यस्मिन् जन्मनि सः .................. अभवत्
(i) सर्पः (ii) शृगालः
(iii) कर्कटः (iv) चटकः

(ग) पूर्वजन्मनः कर्माणि स्मृत्वा सः केवलं ...................... भोजनम् अकरोत्
(i) अन्यैः आनीतानि मांसानि (ii) स्वयं पतितैः फलैः
(iii) अन्येषां पशूनां वधं कृत्वा (iv) वृक्षेभ्यः फलानि त्रोटयित्वा।

(घ) शुभकर्मयुक्तं शृगालं दृष्ट्वा ............................ द्वेषम् अकुर्वन्
(i) पूर्वे सेवकाः (ii) प्रजाजनाः
(iii) व्याघ्रस्य बांधवाः (iv) सैनिकाः

3 (क) पौरिकस्य दुर्गुणद्वयं लिखत।
(ख) शृगालस्य गुणद्वयं लिखत।
(ग) शार्दूलस्य विशेषणं लिखत।

4. श्लोकेभ्यः प×च अव्ययपदानि चित्वा लिखत।

---

## द्वितीयः अंशः

सम्प्रति, द्वितीयम् अंशं पठामः जानीमः च यत् कथं पूर्वकर्मचारिणां कथनेन राजा अनुशासनप्रियं मन्त्रिणं हन्तुम् आदिशति किन्तु तस्य माता ईदृशम् आदेशं न दातुम् उपदिशति।

**श्लोकः 7**

अन्यथा ह्युषिताः
पूर्वं परद्रव्याभिहारिणः।
अशक्ताः किंचिदादातुं
द्रव्यं गोमायुयन्त्रिताः।।7।।

**पदच्छेदः** अन्यथा हि उषिताः पूर्वम् परद्रव्याभिहारिणः।
अशक्ताः किंचित् आदातुम् द्रव्यम् गोमायुयन्त्रिताः।।

**अन्वयः** पूर्वम् अन्यथा हि उषिताः परद्रव्याभिहारिणः गोमायुयन्त्रिताः किंचित् द्रव्यम् आदातुम् अशक्ताः।

भवन्तः जानन्ति एव यत् भ्रष्टमन्त्रिणः शासने कर्मचारिणः राज्यधनहर्तारः भवन्ति।

**व्याख्या**

पूर्वभृत्याः परद्रव्याभिहारिणः – परेषां द्रव्याणि हरन्ति स्म। पूर्वभृत्याः गोमायुना यन्त्रिताः आसन्।





पूर्वभृत्याः किं कर्तुम् अशक्ताः? पूर्वभृत्याः किंचिदपि द्रव्यम् आदातुं –ग्रहीतुम् अशक्ताः– असमर्थाः जाताः। अर्थात् गोमायुः निष्ठावान् विद्वान् मंत्री आसीत्। अतः कर्मकराः तस्य अनुशासने किमपि लोभकरं चौर्यकर्म कर्तुं न शक्नुवन्ति स्म।

**भावार्थः**

व्याघ्रस्य पूर्वकर्मचारिणः पूर्वं भ्रष्टतया जीवन–यापनं कुर्वन्ति स्म, अन्येषां द्रव्याणि हरन्ति स्म परम् इदानीं शृगालस्य अनुशासनात् ते तथा कर्तुम् असमर्थाः अभवन्। ते किंचिदपि चोरयितुम् अशक्ताः जाताः। अतः ते शृगालाय अद्विषन्। ते सर्वे मिलित्वा तं दूरीकर्तुम् उपायान् चिन्तितवन्तः।

बाघ के पूर्वकर्मचारी पहले भ्रष्ट ढंग से मनमानी चोरियां करते पर शृगाल के अनुशासन के कारण उनकी बेईमानी बन्द हो गई और अब वे कुछ भी द्रव्य चुराने में असमर्थ हो गये।

## व्याकरणबिन्दवः

| | |
|---|---|
| हि | निश्चयपूर्वकम्, निस्सन्देहम् |
| उषिताः | वस् + क्त, पुं0 प्रथमा बहुवचनम् |
| परद्रव्यम् | परेषां द्रव्यम्, षष्ठी तत्पुरुषः |
| परद्रव्याभिहारिणः | परेषां द्रव्यस्य अभिहारिणः, षष्ठीतत्पु0 |
| गोमायुयन्त्रिताः | गोमायुना यन्त्रिताः, तृतीयातत्पु0 |
| आदातुम् | आ + दा + तुमुन् |
| अशक्ताः | न शक्ताः नञ् तत्पु0 |
| शक्ताः | शक् + क्त पु0 प्रथमाबहुवचनम् |

**श्लोकः 8**

**पदच्छेदः** ईप्सितम् तु मृगेन्द्रस्य मांसम् यत् यत्र संस्कृतम्।
अपनीय स्वयम् तत् हि तैः न्यस्तम् तस्य वेश्मनि।।

ईप्सितं तु मृगेन्द्रस्य
मांसं यत् यत्र संस्कृतम्।
अपनीय स्वयं तद्धि
तैर्न्यस्तं तस्य वेश्मनि।।8।।

**अन्वयः** यत् मृगेन्द्रस्य तु ईप्सितम् संस्कृतम् यत् मासंम् तत् हि तैः स्वयम् अपनीय तस्य वेश्मनि न्यस्तम्।

**व्याख्या**

तैः इति सर्वनामपदं प्रयुक्तम्।

पूर्वकर्मचारिभिः संस्कृतम्, पाकम्, मांसम्, भोजनार्थम् अपनीतम् यत् च सिंहस्य वांछितम् आसीत्।

किं जानाति भवान् तत् मांसं तैः कुत्र न्यस्तम्? आम्, तैः तत् मांसम् अपनीय तस्य शृगालस्य वेश्मनि = गृहे स्थापितम्। येन क्रुद्धः व्याघ्रः शृगालं चौरं मत्वा हन्यात्।

**भावार्थः**

टिप्पणी

ते पूर्वकर्मचारिणः दुष्टाः आसन्। सिंहस्य कृते तस्य अभिप्रेतं सिद्धं मासं यत्र स्थापितम् आसीत् ततः नीत्वा तैः दुष्टैः शृगालस्य गृहे न्यस्तम्। तेषाम् अभिप्रायः आसीत् यत् सिंहः क्रुद्धः भूत्वा शृगालं चौरं मत्वा तं मारयिष्यति।

वे पूर्वकर्मचारी दुष्ट थे। उन्होंने शेर के प्रिय आहार सिद्ध मांस को चुरा कर गीदड़ के घर में रख दिया जिससे गीदड़ चोर समझा जाए। आज भी प्रायः इस तरह के दुष्ट कार्य प्रतिदिन किये जाते हैं।

## व्याकरणबिन्दवः

| | |
|---|---|
| ईप्सितम् | आप् + सन् + क्त नपुं. प्र. एकवचनम् |
| मृगेन्द्रस्य | मृगानां पशूनाम् इन्द्रः राजा तस्य (षष्ठी तत्पु0) |
| तत्+हि | तद्धि, त् – द्, ह– ध् |
| तैः + न्यस्तम् | तैर्न्यस्तम्, (ः) → र् |
| न्यस्तम् | नि + अस् + क्त नपु. प्रथमा एकवचनम् |
| अपनीय | अप + नी + ल्यप् = नीत्वा |
| वेश्मनि | वेश्मन् सप्तमी एकवचनम् |

**श्लोकः 9**

मृगराजेन चाज्ञप्तं
दृश्यतां चोर इत्युत।
कृतकैश्चापि तन्मांसं
मृगेन्द्रायोपवर्णितम्।।9।।

**पदच्छेदः** मृगराजेन च आज्ञप्तम् दृश्यताम् चोरः इति उत।
कृतकैः च अपि तत् मांसम् मृगेन्द्राय उपवर्णितम्।।

**अन्वयः** दृश्यताम् उत चोरः इति मृगराजेन आज्ञप्तम्। कृतकैः च अपि मृगेन्द्राय तत् मांसम् उपवर्णितम्।

**व्याख्या**

मृगराजेन आज्ञप्तम् चोरः दृश्यताम् इति। कृतकैः = धूर्तैः मृगेन्द्राय तस्य मांसस्य विषये निवेदितम्। भवद्भिः अत्र किं ज्ञातम्? आम्, राज्ञा धूर्तानां चाटुकारिता न ज्ञाता।

| **कर्तृवाच्ये** | **कर्मवाच्ये** |
|---|---|
| मृगराजः आज्ञापितवान् | मृगराजेन आज्ञप्तम्। |
| (यूयं) चौरं पश्यत | चौरः दृश्यताम्। |
| कृतकाः उपवर्णितवन्तः। | कृतकैः उपवर्णितम्। |

**भावार्थः**

सिंहः आदिशत्– चौरं पश्यत। ते धूर्ताः सिंहाय मांसविषये न्यवेदयन्। किम् निवेदितवन्तः इति अग्रिमे पद्ये दत्तम्।

शेर ने आज्ञा दी कि चोर का पता लगाओ। उन धूर्तों ने शेर को मांसविषयक सारी बातें बताईं। क्या बताया इसके विषय में अगले पद्य में पढ़ेंगे।

## व्याकरणबिन्दवः

| | |
|---|---|
| मृगराजेन | मृगाणां राजा मृगराजः तेन, षष्ठीतत्पुरुषः। |
| आज्ञप्तम् | आ +ज्ञा + क्त पुं. प्रथमा एकवचनम् |
| दृश्यताम् | दृश् कर्मवाच्ये यक् लोट् प्रथमा एकवचनम् |
| उपवर्णितम् | उप + वर्ण + क्त पुं. प्रथमा एकवचनम् |

**श्लोकः 10**

सचिवेनापनीतं ते
विदुषा प्राज्ञमानिना।
सरोषस्त्वथ शार्दूलः
श्रुत्वा गोमायुचापलम्।।10।।

**पदच्छेदः** सचिवेन अपनीतम् ते विदुषा प्राज्ञमानिना।
सरोषः तु अथ शार्दूलः श्रुत्वा गोमायुचापलम्।।

**अन्वयः** अथ, ते विदुषा प्राज्ञमानिना सचिवेन अपनीतम् गोमायुचापलम् तु श्रुत्वा शार्दूलः सरोषः (अभवत्)

**व्याख्या**

ते दुष्टाः सिंहम् अवदन्– तन्मांसं ते विदुषा प्राज्ञमानिना अपहृतम्। एतत् श्रुत्वा सरोषः, शार्दूलः कुपितः अभवत्। सिंहः तु शृगालस्य मनसः चपलतां विज्ञाय क्रुद्धः अभवत्।

किं वस्तुतः शृगालः दोषी आसीत्? नैव! दुष्टैः अनृतम् उक्त्वा मिथ्यारोपः कृतः।

वस्तुतः शृगालः व्याघ्रस्य विद्वान् बुद्धिमान् च सचिवः अभवत्। परं दुष्टैः भृत्यैः द्वेषभावेन राजा एवम् कथितः येन मृगेन्द्रः तं चौरं ज्ञात्वा खिन्नः जातः।

**भावार्थः**

ते दुष्टाः व्याघ्रम् अवदन्– तन्मांसं तव विदुषा बुद्धिमता सचिवेन शृगालेन अपहृतम्। सः शृगालः वस्तुतः चौरः यं त्वं विद्वान् बुद्धिमान् इव मन्यसे। व्याघ्रः एतच्छ्रुत्वा कुपितः अभवत्।

दुष्टों ने व्याघ्र को कहा कि तुम्हारा भोजन तुम्हारे विद्वान और बुद्धिमान मन्त्री द्वारा चुराया गया है। शृगाल की इस धृष्टता को सहन न करते हुए व्याघ्र कुपित हो गया।

## व्याकरणबिन्दवः

| | |
|---|---|
| सचिवेन + अपनीतम् | सचिवेनापनीतम् दीर्घसन्धिः |
| अपनीतम् | अप+नी+ क्त नपुं प्रथमा एकवचनम् |
| विदुषा | विद्वस् तृतीया एकवचनम् |
| प्राज्ञमानिना | प्राज्ञमानिन् तृतीया एकवचनम् |
| सरोषः + तु + अथ | सरोषस्त्वथ, : – स्, उ. → व् (यण् सन्धिः) |

**श्लोकः 11–12**

आज्ञापयामास तदा
गोमायुर्वध्यतामिति।
शार्दूलस्य वचः श्रुत्वा
शार्दूलजननी ततः।।11।।
मृगराजं हितैर्वाक्यैः
सम्बोधयितुमागमत्।
पुत्र! नैतत् त्वया ग्राह्यं
कपटारम्भसंयुतम्।।12।।

**पदच्छेदः** आज्ञापयामास तदा गोमायुः वध्यताम् इति।
शार्दूलस्य वचः श्रुत्वा शार्दूलजननी ततः।।
मृगराजम् हितैः वाक्यैः सम्बोधयितुम् आगमत्।
पुत्र! न एतत् त्वया ग्राह्यम् कपटारम्भसंयुतम्।।

**अन्वयः** तदा (सरोषः शार्दूलः) 'गोमायुः वध्यताम्' इति आज्ञापयामास। ततः शार्दूलस्य वचः श्रुत्वा शार्दूलजननी मृगराजम् हितैः वाक्यैः सम्बोधयितुम् आगमत्। पुत्र! कपटारम्भसंयुतम् एतत् त्वया न ग्राह्यम्।

**व्याख्या**

शार्दूलजननी = शार्दूलस्य जननी। क्रुद्धः व्याघ्रः शार्दूलः शृगालस्य चपलतां श्रुत्वा क्रुद्धः अभवत् आज्ञाप्तवान् च 'शृगालः वध्यताम्'। शादूर्लस्य वचः 'शृगालः वध्यताम्' इति श्रुत्वा शार्दूलस्य माता शीघ्रमेव तत्र बोधयितुम् आगमत्। सा हितकरैः वाक्यैः तं सम्बोधयति– पुत्र! त्वया एतत् कपटारम्भसंयुतं न ग्राह्यम्। यतः तत्सर्वं षड्यन्त्रेण युक्तम्।

**भावार्थः**

व्याघ्रस्य माता शृगालस्य मृत्युदण्डविषये श्रुत्वा व्याघ्रं सम्बोधयितुम् आगच्छत्। सा अवदत्–पुत्र त्वम् एतस्मिन् कपटपूर्वकेण षड्यन्त्रेण युक्तम् एतत् तथ्यं मा विश्वसिहि। अत्र तु किमपि कपटम् अस्ति।

व्याघ्र की माता ने शृगाल का मृत्युदण्ड सुनकर उसको हितकर वचनों से समझाया कि पुत्र इसमें किसी ने कोई कपट पूर्ण षड्यन्त्र किया है अतः इस बात को यथावत् मत स्वीकार करो।

## व्याकरणबिन्दवः

| | | |
|---|---|---|
| वचः | वचस् द्वितीया एकवचनम् | |
| हितैः+वाक्यैः | हितैर्वाक्यैः | (:) → र |
| सम्बोधयितुम् | सम् बुध् णिच् तुमुन् | |



टिप्पणी

| | |
|---|---|
| न + एतत् | नैतत्, वृद्धिसन्धिः |
| ग्राह्यम् | ग्रह् + ण्यत् नपुं0 प्रथमा एकवचनम् |
| कपटारम्भः | कपटस्य आरम्भः, षष्ठीतत्पुरुषः |
| कपटारम्भेन संयुतम् | कपटस्य आरम्भः तेन संयुतम् |

**द्वितीयांशसारः**

ते कर्मचारिणः भ्रष्टाः आसन्। इदानीं शृगालस्य अनुशासने ते चौर्यकर्म कर्तुमशक्ताः एकम् उपायं चिन्तितवन्तः। व्याघ्रस्य कृते सिद्धं मांसं हृत्वा शृगालस्य निवासस्थाने अस्थापयन्। ते व्याघ्रं सूचितवन्तः यत् तन्मांसं शृगालेन हृतम्। तत् ज्ञात्वा व्याघ्रः आदिशत् शृगालः हन्यताम् इति। एतत् ज्ञात्वा व्याघ्रस्य माता अवदत् पुत्र! त्वया सुष्ठु न कृतम्। एतत् कपटपूर्णम् आचरणं प्रतीयते।

वे कर्मचारी दुष्ट थे। शृगाल के नियन्त्रण के कारण अब वे चोरी आदि न कर पाते थे। अतः उन्होंने एक दिन व्याघ्र के लिए तैयार मांस को चुरा कर शृगाल के घर में छुपा दिया और व्याघ्र को कह दिया कि तुम्हारे सविच शृगाल ने यह मांस चुराया है। व्याघ्र ने गुस्से में आकर शृगाल को मार डालने की आज्ञा दे दी। तभी उसकी माता ने उस व्याघ्र को समझाया कि इसमें कोई चाल है। अतः ऐसा आदेश मत दो।

## पाठगतप्रश्नाः 16.2

1. एकपदेन उत्तरं ददतु
   (क) पूर्वकर्मचारिणः केन यन्त्रिताः आसन्?
   (ख) पूर्वकर्मचारिभिः किमपनीतम्?
   (ग) शार्दूलः दुष्कृतां वार्तां श्रुत्वा कीदृशः अभवत्?
   (घ) शार्दूलः कस्य वधस्य आज्ञां दत्तवान् ?
   (ङ) शार्दूलमाता शार्दूलं कीदृशैः वाक्यैः समबोधयत्?
2. अधोलिखितपदानां योजनेन समस्तपदानि रचयन्तु
   (क) गोमायुना यन्त्रिताः
   (ख) मृगानां राजा तेन
   (ग) रोषेण सह विद्यमानः
   (घ) गोमायोः चापलम्
   (ङ) शार्दूलस्य जननी
   (च) कपटारम्भेन संयुतम्

टिप्पणी

3. कर्तृवाच्यान्तानि कर्मवाच्ये परिवर्त्य लिखन्तु
   (क) मृगराजः आज्ञप्तवान्।
   (ख) चौरं पश्यत।
   (ग) कृतकाः मृगेन्द्राय उपवर्णितवन्तः

## तृतीयः अंशः

**श्लोकः 13**

दूषितं परदोषैर्हि गृह्णीते
योऽन्यथा शुचिम्।
स्वयं सन्दूषितामात्यः
क्षिप्रमेव विनश्यति।।13।।

**पदच्छेदः** दूषितम् परदोषैः हि गृह्णीते यः अन्यथा शुचिम्।
स्वयम् सन्दूषितामात्यः क्षिप्रम् एव विनश्यति।।

**अन्वयः** यः परदोषैः हि दूषितम् अन्यथा शुचिम् (दण्डयति) (सः) सन्दूषितामात्यः स्वयं क्षिप्रम् एव विनश्यति।

अस्मिन् अंशे वयं पठामः यत् राज्ञः दूषितैः सचिवैः किं जायते? श्रृगालः च कथं मुक्तः भवति। सुदृढ़ा मैत्री च विरला दृश्यते इति।

शार्दूलस्य माता शार्दूलं सम्बोधयति। पुत्र! जानासि किम्? कः राजा विनश्यति? ''यस्य अमात्याः सन्दूषिताः, सः राजा विनश्यति। यतः ईदृशाः मन्त्रिणः राजहितपरायणाः न भवन्ति।'' सन्दूषितामात्यः राजा तु परदौषैः हि दूषितं पवित्रं जनं गृह्णाति। अत्र पश्यतु सः जनः श्रृगालः पवित्रः अस्ति। सः परेषां दोषैः दूषितः भवति। अतः एवम्भूतः राजा शीघ्रमेव (क्षिप्रम् एव) विनश्यति। यतः निर्दोषाय दण्डप्रदानम् राज्ञः महान् अपराधः।

**भावार्थः**

यस्य स्वयं राज्ञः अमात्याः दूषिताः सन्ति, यः वस्तुतः पवित्रं जनं केवलं परेषां दोषैः मिथ्या कलङ्कितं दण्डयति, तस्य राज्ञः शीघ्रम् एव विनाशः भवति। अतः निर्दोषः कदापि न दण्डनीयः।

जिस राजा के मन्त्री दूषित होते हैं और राजा को बहका कर पवित्र निर्दोष व्यक्ति पर दोषारोपण कर देते हैं और जो राजा उस निर्दोष व्यक्ति को दण्ड देता है, वह शीघ्र ही नष्ट हो जाता है। इसलिए राजा निर्दोष को कभी भी दण्ड न दे।

## व्याकरणबिन्दवः

| | | |
|---|---|---|
| परदोषैः + हि | परेषां दोषैः | षष्ठी तत्पु. |
| यः + अन्यथा | योऽन्यथा | : – उ, अ = उ = ओ, अ = ऽ |
| सन्दूषितामात्यः | सन्दूषिताः अमात्याः यस्य सः | बहुब्रीहिः |





| | | |
|---|---|---|
| क्षिप्रम् | शीघ्रम् | अव्ययपदम् |
| एव | एव | अव्ययपदम् |
| विनश्यति | वि + नश् + लट् प्र.पु. एकवचनम् | |

**श्लोकः 14**

**पदच्छेदः** तस्मात् अपि अरिसंघातात् गोमायोः कः चित् आगतः।
धर्मात्मा तेन च आख्यातम् यथा एतत् कपटम् कृतम्।।

तस्मादप्यरिसंघाताद्
गोमायोः कश्चिदागतः।
धर्मात्मा तेन चाख्यातं
यथैतत् कपटं कृतम्।।14।।

**अन्वयः** गोमायोः तस्मात् अपि अरिसंघातात् कश्चित् धर्मात्मा आगतः तेन च आख्यातम् यथा एतत् कपटम् कृतम्।

**व्याख्या**

तदैव तस्मात् गोमायोः अरिसंघातात्, तस्य श्रृगालस्य शत्रुसमूहात् कश्चिद् धर्मात्मा पशुः आगतः। किं भवान् जानाति तदा धर्मात्मा पशुः राजानं किं वदति? आम् तेन धर्मात्मापशुना आख्यातम् यथा एतत् कपटं कृतम् इति। सः धर्मात्मा यत् किमपि कपटं कृतम् आसीत् तत् सर्वं कथितवान्।

एतेन किं ज्ञायते? यत् राज्ये दुष्टाः भवन्तु नाम परं राजसभायां एकेनापि धर्मात्मना अनर्थात् रक्षा भवत्येव।

**भावार्थः**

तस्मात् श्रृगालस्य शत्रुसमूहात् कश्चित् धर्मात्मा सिंहाय तत्सर्वं कपटं निवेदितवान्, यथा तैः दुष्टैः स्वयं चोरयित्वा निर्दोषश्रृगालस्य गृहे मांसं स्थापितम्।

उस सचिव श्रृगाल के शत्रुसमूह में से किसी धर्मात्मा सियार ने आकर शेर को सब कुछ कपट पूर्ण षड्यन्त्र के विषय में बता दिया कि किस प्रकार उन दुष्टों ने स्वयं मांस चुराकर उस निर्दोष श्रृगाल के घर में रखवा दिया था।

## व्याकरणबिन्दवः

**सन्धिविच्छेदः**

| | |
|---|---|
| तस्मात् + अपि + अरिसंघातात् | तस्मादपि + अरिसंघातात् |
| | तस्मादप्यरिसंघातात्; त → द, इ → य |
| कः + चित् | कश्चित्; (:) → श् |
| कश्चित् + आगतः | कश्चिदागत; त् → द् (जश्त्व सन्धिः) |

टिप्पणी

| | |
|---|---|
| च + आख्यातम् | चाख्यातम्; अ + आ = आ दीर्घसन्धिः |
| यथा + एतत् | यथैतत्, आ + ए = ऐ वृद्धिः |

**वाच्यपरिवर्तनम्**

| **कर्मवाच्यम्** | **कर्तृवाच्यम्** |
|---|---|
| तेन आख्यातम् | सः आख्यातवान् |
| यथा एतत् कपटं कृतम् | यथा (ते) एतत् कपटं कृतवन्तः |

**श्लोकः 15**

ततो विज्ञातचरितः
सत्कृत्य स विमोक्षितः
परिष्वक्तश्च सस्नेहं
मृगेन्द्रेण पुनः पुनः ।।15।।

**पदच्छेदः** ततः विज्ञातचरितः सत्कृत्य सः विमोक्षितः।
परिष्वक्तः च सस्नेहम् मृगेन्द्रेण पुनः पुनः।।

**अन्वयः** ततः मृगेन्द्रेण विज्ञातचरितः सः सत्कृत्य विमोक्षितः पुनः पुनः सस्नेहम् परिष्वक्तः च।

**व्याख्या**

विज्ञातचरितः विज्ञातं चरितं यस्य सः अर्थात् यदा राजा श्रृगालस्य शुद्धं चरित्रं ज्ञातवान् तदा तेन श्रृगालः मुक्तः कृतः।

केन सः पुनः पुनः परिष्वक्तः? ततः मृगेन्द्रेण सः पुनः पुनः सस्नेहं परिष्वक्तः = आलिंगितः। एतेन ज्ञायते यत् राजा विवेकशीलः न्यायप्रियः स्वयमेव स्यात् तस्य कर्मचारिणः अपि निष्ठावन्तः स्युः।

**भावार्थः**

यथा व्याघ्रः श्रृगालस्य निर्दुष्टं चरित्रम् अजानात् तदा तेन सः अपराधात् मुक्तः कृतः, स्नेहपूर्वकं पुनः पुनः वारम्वारं तम् आलिंगितवान्। राज्ञः एषः व्यवहारः न्यायप्रियः विवेकशीलः च।

तब विज्ञातचरित वाला वह सियार सत्कार करके अपराध से मुक्त कर दिया गया और व्याघ्र ने बार बार स्नेहपूर्वक उसका आलिंगन किया। राजा का यह व्यवहार न्यायप्रिय और विवेकसम्मत था।

## व्याकरणबिन्दवः

**सन्धिच्छेदाः**

| | |
|---|---|
| ततः+ विज्ञातचरितः | ततो विज्ञातचरितः; (:) → उ, अ + उ = ओ |
| परिष्वक्ताः + च | परिष्वक्ताश्च; (:) → श् |



टिप्पणी

**विग्रहाः**

| | | |
|---|---|---|
| विज्ञातं चरितं यस्य सः | विज्ञातचरितः। | (बहुव्रीहिः) |
| स्नेहेन सहितम् | सस्नेहम् | (अव्ययीभावः) |
| मृगाणाम् इन्द्रः तेन | मृगेन्द्रेण | (ष. त.) |
| पुनः पुनः | अव्ययम् | |

**कृदन्तप्रत्ययाः**

| | |
|---|---|
| सत् कृत्य | सत्कृत्य = सत्कारं कृत्वा, सत् कृ + ल्यप् |
| विमोक्षितः | वि + मोक्ष् + क्त पुं–प्रथमा एकवचनम् |
| परिष्वक्तः | परि + ष्वज् + क्त पुं प्रथमा एकवचनम् |

**श्लोकः 16**

तं स गोमायुरालोक्य
स्नेहादागतसम्भ्रमम्।
उवाच प्रणतो वाक्यं
बाष्पगद्गदया गिरा।।16।।

**पदच्छेदः** तम् सः गोमायुः आलोक्य सस्नेहात् आगतसम्भ्रमम्।
उवाच प्रणतः वाक्यम् वाष्पगद्गदया गिरा।।

**अन्वयः** सः गोमायुः सस्नेहात् आगतसम्भ्रमम् तम् आलोक्य प्रणतः वाष्पगद्गदया गिरा वाक्यम् उवाच।

**व्याख्या**

गोमायुः तं (व्याघ्रम्) आलोक्य स्नेहात् आगतसम्भ्रमम् अर्थात् स्नेहेन अत्यधिकं व्याकुलम् आगतं व्याघ्रं दृष्ट्वा, प्रणतः श्रृगालः, प्रकृष्टेन नतः = अर्थात् प्रणामं कृत्वा, बाष्पगद्गदया गिरा उवाच। अर्थात् राज्ञः न्यायप्रियव्यवहारेण श्रृगालः मुक्तः सन् कृतज्ञतया भावविह्वलः जातः। तस्य कण्ठः अवरुद्धः भवति। नेत्राभ्याम् अश्रुपातः भवति। ततः काठिन्येन प्रणम्य राजानं शनैः वदति।

**भावार्थः**

सः श्रृगालः अपश्यत् यत् व्याघ्रः अतिस्नेहात् व्याकुलः अस्ति, अतः सः अपि प्रणामं कृत्वा अश्रुपूर्णवाण्या तम् अवदत्।

श्रृगाल ने देखा कि व्याघ्र स्नेह से अत्यधिक व्याकुल है। अतः पहले व्याघ्र को उसने प्रणाम किया और आंसुओं से भीगी वाणी में उसको कहने लगा।

## व्याकरणबिन्दवः

**संधिच्छेदाः**

| | |
|---|---|
| गोमायुः + आलोक्य | गोमायुरालोक्य; (:) → र् |
| स्नेहात् + आगतसम्भ्रमम् | स्नेहादागतसम्भ्रमम्; त् – द् |
| प्रणतः + वाक्यम् | प्रणतो वाक्यं, (:) → उ, अ + उ = ओ, म् ( ं ) |

**विग्रहाः**

| | | |
|---|---|---|
| आगतः सम्भ्रमः यस्मिन् तम् | आगतसम्भ्रमम् | (बहुव्रीहिः) |
| बाष्पेण गद्गदया | बाष्पगद्गदया | (तृतीया तत्पु.) |

**शब्दरूपाणि**

गिरा — गिर् तृतीया एकवचनम्

**श्लोकः 17**

दुःखेन श्लिष्यते भिन्नं,
शिलष्टं दुःखेन भिद्यते।
भिक्षा शिलष्टा तु या मैत्री,
न सा स्नेहेन वर्तते।।17।।

**पदच्छेदः** दुःखेन श्लिष्यते भिन्नम् श्लिष्टम् दुःखेन भिद्यते।
भिन्ना श्लिष्टा तु या मैत्री, न सा स्नेहेन वर्तते।।

**अन्वयः** भिन्नम् दुःखेन श्लिष्यते, श्लिष्टम् दुःखेन भिद्यते (वः) या मैत्री भिन्ना श्लिष्टा सा तु स्नेहेन न वर्तते।

अस्मिन् पद्ये कीदृशी मैत्री दृढ़ा भवति? इति पठामः।

**व्याख्या**

श्लिष्यते = संयुक्ता भवति।

कीदृशी मैत्री दुःखेन श्लिष्यते? भिन्नं सख्यम्। (यदा मित्रे भिन्ने पृथक् भवतः, तदा तयोः मध्ये पुनः मैत्री कष्टेन एव भवति।)

पुनः दुःखेन किं भिद्यते? श्लिष्टं सख्यम् = घनिष्ठा मैत्री। अर्थात् ययोः मित्रयोः घनिष्ठा दृढा मैत्री भवति सा काठिन्येन एव भिद्यते, पृथग् भवति।

कीदृशी मैत्री स्नेहेन न वर्तते? या क्षणे श्लिष्टा क्षणे च भिन्ना। या मैत्री एकस्मिन् क्षणे भिन्ना भवति, अन्यस्मिन् क्षणे श्लिष्टा भवति। तस्मिन् सख्यभावे स्नेहः न वर्तते।

**भावार्थः**

दृढ़ा मैत्री चिरस्थायिनी भवति, क्षणे क्षणे भिन्ना/संयुक्ता च न भवति। तत्र परस्परं विश्वासः भवति।या च मैत्री क्षणे क्षणे संयुक्ता असंयुक्ता च जायते, तस्याम् मैत्र्यां स्नेहस्य अभावः वर्तते।

मित्रता की आधारशिला है परस्पर विश्वास और स्नेह। वह एक बार स्थापित हो जाय तो टूटती नहीं और टूट जाय तो जुड़ती नहीं। जो मैत्री क्षण में टूटती और जुड़ती रहे, उसमें स्नेह नहीं होता।

## व्याकरणबिन्दवः

| | |
|---|---|
| भिन्नम् | भिद् + क्त नपुं0 प्रथमा एकवचनम् |
| श्लिष्टम् | श्लिष् +क्त नपुं0 प्रथमा एकवचनम् |

| | |
|---|---|
| भिन्ना/शिलष्टा | स्त्रीलिंगे, प्रथमा एकवचनम् |
| शिलष्यते | शिलष् कर्मवाच्य, लट् प्रथमपुरुषे एकवचनम् |
| भिद्यते | भिद् कर्मवाच्य, लट् प्रथमपुरुषे एकवचनम् |

**श्लोकः 18**

**पदच्छेदः** कः चित् एव हिते भर्तुः दृश्यते न परात्मनोः।
कार्यापेक्षाः हि वर्तन्ते भावस्निग्धाः सुदुर्लभाः।।

कश्चिदेव हिते भर्तुर्दृश्यते
न परात्मनोः।
कार्यापेक्षाः हि वर्तन्ते
भावस्निग्धाः सुदुर्लभाः।।18।।

**अन्वयः** कश्चित् एव भर्तुः (एव) हिते दृश्यते परात्मनोः न। कार्यापेक्षाः हि (बहवः) वर्तन्ते, भावस्निग्धाः (तु) सुदुर्लभाः।

अस्मिन् पद्ये ज्ञापितं यत् ''शुद्धहृदयाः जनाः स्वामिहितकराः दुर्लभाः एव भवन्ति।

**व्याख्या**

कः भर्तुः हिते दृश्यते? कश्चिद् एव भर्तुः हिते दृश्यते। कश्चिद् (एकः) कस्य हिते न दृश्यते। न परस्य हिते न च आत्मनः हिते। अर्थात् एषः नरः विरलः एव यः स्वकीय हितं न पश्यति, न च परस्य हितं पश्यति अपितु भर्तुः (स्वामिनः) एव हितं पश्यति।

किं भवन्तः जानान्ति जगति– 1. प्रायः जनाः कीदृशाः वर्तन्ते? कार्यापेक्षाः। 2. कीदृशाः जनाः सुदुर्लभाः भावस्निग्धाः अर्थात् शुद्धभावेन स्वामिहितकारकाः जनाः दुर्लभाः एव मिलन्ति।

**भावार्थः**

प्रायशः जनाः आत्मनः हितं पश्यन्ति, अथवा अन्यस्य हितं पश्यन्ति परन्तु सर्वं विस्मृत्य स्वामिनः हितम् एव ये पश्यन्ति तादृशाः जनाः विरलाः एव सन्ति। अधिकांशतः जनाः स्वार्थपरकाः भवन्ति। शुद्धभावेन स्वामिहितकारकाः तु दुर्लभा एव।

प्रायः मनुष्य अपना या अन्य का स्वार्थ ही देखते हैं और मतलबी होते हैं। शुद्ध हृदयवाले, सच्ची पवित्र मित्रता वाले मुश्किल से ही मिलते हैं।

## व्याकरणबिन्दवः

| | |
|---|---|
| भर्तु : | भर्तृ षष्ठी एकवचनम् |
| परात्मनोः | परस्य च आत्मनः च (द्वन्द्वसमासः) |
| कार्यापेक्षाः | कार्यम् अपेक्षितं यैः ते कार्यापेक्षाः |
| भावस्निग्धाः | भावेन स्निग्धाः, भावेन स्नेहयुक्ताः (सप्तमीतत्पुरुषः) |
| सुदुर्लभाः | दुःखेन लभ्यते इति दुर्लभः (उपपद तत्पु.) |
| | सम्यक् दुर्लभः इति सुदुर्लभः (उपपद) |

टिप्पणी

एवंविधं सान्त्वमुक्त्वा
धर्मकामार्थहेतुमत्।
प्रसादयित्वा राजानम्
गोमायुर्वनमभ्यगात् ।।19।।

**श्लोक: 19**

**पदच्छेद:** एवम् विधम् सान्त्वम् उक्त्वा धर्मकामार्थहेतुमत्।
प्रसादयित्वा राजानम् गोमायुः वनम् अभ्यगात्।।

**अन्वय:** धर्मकामार्थहेतुमत् एवम् विधम् सान्त्वम् उक्त्वा राजानम् प्रसादयित्वा गोमायुः वनम् अभ्यगात्।

अस्मिन पद्ये वयं गोमायुः कथं वनं गतः? इति बोधामः।

**व्याख्या**

राजानं प्रसादयित्वा, प्रसन्नं कृत्वा वनं गतवान्।

राजानं किम् उक्त्वा वनं गतः? गोमायुः राजानं सान्त्वम् धर्मकामार्थहेतुमत् उक्तवान्। अर्थात् धर्म–काम– अर्थपूर्ण शान्तिवचनानि उक्त्वा (उपदिश्य) सचिवपदं च त्यक्त्वा वनं प्रति गतवान्। महान्तः पुरुषाः लाभं त्यक्त्वा वनं गच्छन्ति।

**भावार्थ:**

शृगालः व्याघ्रं धर्म–काम–अर्थपूर्णानि शान्तियुक्तानि वचनानि उक्त्वा, प्रसन्नं च कृत्वा; सचिवपदं त्यक्त्वा वैराग्यंप्राप्तः वनम् अगच्छत्।

गीदड़ व्याघ्र को इस प्रकार अनेक शान्तिपूर्ण धर्म–अर्थ–काम युक्त वचन कहकर, प्रसन्न करके सचिव पद को त्याग कर वन में चला गया क्योंकि मान ही महापुरुषों का धन है।

## व्याकरणबिन्दवः

| | |
|---|---|
| उक्त्वा | ब्रू – वच् + क्त्वा, कथयित्वा |
| प्रसादयित्वा | प्र + सद् + णिच् + क्त्वा, प्रसन्नं कृत्वा |
| राजानम् | राजन् शब्दः द्वितीया एकवचनम् |
| धर्मकामार्थहेतुमत् | धर्मः च कामः च अर्थः च धर्मकामार्थः (द्वन्द्वः) |
| | धर्मकामार्थस्य हेतुः = (ष. त.) धर्मकामार्थहेतुः अस्ति अस्य |
| | धर्मकामार्थहेतुमत् (मतुप् प्रत्ययः) |
| एवंविधं | अव्ययम् |



टिप्पणी

## 'सर्व'— सर्वनाम शब्दस्य त्रिषु लिङ्गेषु रूपाणि

### सर्व (पुल्लिङ्गम्)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वः | सर्वौ | सर्वे |
| द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वैः |
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पञ्चमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |

### सर्व (स्त्रीलिङ्गम्)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वाः |
| द्वितीया | सर्वाम् | सर्वे | सर्वाः |
| तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| चतुर्थी | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| पञ्चमी | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| षष्ठी | सर्वस्याः | सर्वयोः | सर्वासाम् |
| सप्तमी | सर्वस्याम् | सर्वयोः | सर्वासु |

### सर्व (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | सर्वम् | सर्वे | सर्वाणि |
| द्वितीया | सर्वम् | सर्वे | सर्वाणि |

## पाठगतप्रश्नाः 16.3

1. (क) व्याघ्रं का सम्बोधयति?
   (ख) कः कपटस्य रहस्यं विवृतम् अकरोत्?
   (ग) सत्यं ज्ञात्वा व्याघ्रः किंम् अकरोत्?
   (घ) कीदृशी मैत्री स्नेहयुक्ता न भवति?
   (ङ) कीदृशाः जनाः सुदुर्लभाः?

2. निम्नलिखितेषु क्रियापदानि योजयन्तु
   (क) कश्चिद् धर्मात्मा व्याघ्रं सर्वम् .............................................. ।
   (ख) व्याघ्रः अतीव सम्भ्रान्तः भूत्वा श्रृगालं .............................................. ।
   (ग) श्रृगालः व्याघ्रं वाष्पगद्गदया वाण्या .............................................. ।
   (घ) विरलः एव स्वामिनः हिते कार्यपरः .............................................. ।
   (ङ) प्रायशः जनाः कार्यापेक्षाः .............................................. ।
3. विशेष्यैः सह विशेषणानि योजयन्तु

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (क) धर्मात्मा | 1. मैत्री |
| (ख) एवंविधम् | 2. गिरा |
| (ग) भिन्ना | 3. गोमायुः |
| (घ) विज्ञातचरितः | 4. नृपः |
| (ङ) बाष्पगद्गदया | 5. सान्त्वम् |
| (च) सन्दूषितामात्यः | 6. वचनम् |
| (छ) सान्त्वम् | 7. मृगेन्द्रः |

**सारांशः**

तदा एकः धर्मात्मा कर्मचारी शत्रुदलात् आगत्य व्याघ्राय वस्तुस्थितिं निवेदितवान्। सत्यं ज्ञात्वा व्याघ्रः श्रृगालस्य सम्मानम् अकरोत् परन्तु श्रृगालः अवदत् या मैत्री क्षणे क्षणे भिन्ना श्लिष्टा वा भवति सा मैत्री स्थायिनी नास्ति। अतः राजानं धर्मपूर्वकानि वचनानि कथयित्वा श्रृगालः सचिवपदं त्यक्त्वा वनमगच्छत्। नूनं महापुरुषाणां कृते सम्मानः एव धनं भवति।

तभी शत्रुदल के ही एक धर्मात्मा कर्मचारी ने आकर व्याघ्र को सब कुछ सच–सच बता दिया। यह जानकर व्याघ्र श्रृगाल के पास गया। उसका सम्मान करते हुए उसे गले से लगाया परन्तु श्रृगाल ने कहा– जो मित्रता एक क्षण में जुड़ जाय और दूसरे ही क्षण में अलग हो जाय वह सच्ची मित्रता नहीं हो सकती। इस प्रकार धर्मपूर्वक व्याघ्र को समझा बुझा कर श्रृगाल सचिव पद को छोड़ कर वन को चला गया। सच है, महापुरुषों के लिए स्वाभिमान ही धन है।

## 16.4 किम् अधिगतम्

- महाभारतम् ज्ञानस्य कोषः।
- जनाः स्वार्थवशीभूताः कपटं कुर्वन्ति परन्तु अस्माभिः तेषां वशे न भवितव्यम्।
- भावशुद्धाः जनाः सुदुर्लभाः भवन्ति।

- कर्मवाच्ये वाक्यानि यदा कर्तृवाच्ये परिवर्त्यन्ते तदा कर्म प्रथमान्तम्, कर्ता तृतीयान्तं, कर्त्रा सह क्रियाया: सम्बन्ध: भवति।
- स्वरसन्धि: पूर्वपदस्य अन्तिमेन स्वरेण परपदस्य प्रथमस्वरवर्णेन मिलित्वा संभवति।
- द्वन्द्वसमासे द्वयो: अनेकेषां च पदानां समाहारेण योजनं भवति।
- बहव्रीहिसमासे अन्यपदं प्रधानं भवति।
- 'सर्व' सर्वनाम शब्दस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

## 16.5 योग्यताविस्तार:

### (क) ग्रन्थपरिचय:

महाभारतं पञ्चम: वेद: मन्यते। अस्य रचयिता अस्ति महर्षिकृष्णद्वैपायनव्यासमहाभाग:। अस्मिन् ग्रन्थे एतादृश: कोऽपि विषय: न अस्ति य: अत्र न वर्णित:। स्वयमेव कथयति महर्षि: व्यास:–

धर्मे अर्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्।।

अतएव् महत्त्वात् भारवत्त्वाच्च महाभारतम् उच्यते। अस्मिन् ग्रन्थे शतसहस्रसंख्याका: श्लोका: सन्ति। अत्र अष्टादश पर्वाणि सन्ति। प्रस्तुत: पाठ: महाभारतस्य शान्तिपर्वण: एकादशाधिकशततमात् अध्यायात् सङ्कलित:।

### (ख) (i) समानार्थकसूक्तय:

(i) आमिषं चैव नो हीष्टमामिषस्य विवर्जनम् (महाभारतम् शा.प. 7.10)

(ii) त्यागवांश्च पुन: पापं नालं कर्तुम् इति श्रुति: (महा. अनु. पं. 7.38)

(iii) कर्मेव हि कर्तव्यं नास्ति सिद्धिरकर्मण:। (महा. अ. प. 10.26)

(iv) उद्यमो मित्रवद् ग्राह्य: प्रमादं शत्रुवत् त्यजेत्। (बुद्धचरितम् 26.73)

(v) हिंसा भार्या त्वधर्मस्य। (अग्नि. पु. 20.18)

### (ii) क्तान्तविशेषणपदानि विशेष्याणि च

| | |
|---|---|
| अपहृतानि | मांसानि |
| पतितै: | फलै: |
| हितै: | वाक्यै: |
| विज्ञातम् | चरितम् |
| प्रणत: | शृगाल: |
| भिन्ना | मैत्री |

**(iii) क्तान्तक्रियापदानि** **(कर्तृवाच्ये क्त प्रयोगः)**

| | |
|---|---|
| सः गोमायुत्वं सम्प्राप्तः। | प्र + आप् + क्त |
| निर्वेदं परमं गतः। | गम् + क्त |
| गोमायोः अरिसंघातात् कश्चिद् आगतः। | आ + गम् + क्त |
| | **कर्मवाच्ये क्त प्रयोगः** |
| तेन आख्यातम् | आ ख्या क्त |
| तैः एतत् कपटं कृतम् | कृ + क्त |

| **(iv) धातुः** | **क्तान्तपदम्** | **ल्यबन्तपदम्** | **तुमुनन्तपदम्** |
|---|---|---|---|
| आ + रुह् | आरूढः (चढ़ा हुआ) | आरुह्य (चढ़ कर) | आरोढुम् (चढ़ने के लिए) |
| उप + दिश् | उपदिष्टः (उपदेश दिया गया) | उपदिश्य (उपदेश देकर) | उपदेष्टुम् (उपदेश देने के लिए) |
| प्र + विश् | प्रविष्टः (प्रवेश किया हुआ) | प्रविश्य (प्रवेश करके) | प्रवेष्टुम् (प्रवेश करने के लिए) |
| आ + नी | आनीतः (लाया गया) | आनीय (लाकर) | आनेतुम् (लाने क लिए) |
| वि + लिख् | विलिखितः (लिखा गया) | विलिख्य (लिखकर) | विलेखितुम् (लिखने के लिये) |
| आ + गम् | आगतः (आया हुआ) | आगम्य / आगत्य (आकर) | आगन्तुम् (आने के लिए) |
| प्र + दा | प्रदत्तः (दिया गया) | प्रदाय (देकर) | प्रदातुम् (देने के लिए) |

## 16.6 पाठान्तप्रश्नाः

1. अधोलिखितवाक्यानि घटनाक्रमानुसारं लेखनीयानि
   (क) एकः मृगराजः व्याघ्रः तं व्रतिनं दृष्ट्वा सचिवपदे नियुक्तवान्
   (ख) तस्मिन् जन्मनि सः पूर्वजन्मकृतां हिंसां स्मरति स्म।
   (ग) एकः पौरिकः नाम नृपः क्रूरः च आसीत्।
   (घ) अतः स हिंसां परित्यज्य स्वयं पतितैः फलैः जीवनयापनं करोति स्म।
   (ङ) राज्ञा व्याघ्रेण तं चौरं मत्वा तस्य वधाय आज्ञा दत्ता।

(च) राज्ञा मोचितः शृगालः सचिवपदं त्यक्त्वा वनम् अगच्छत्।

(छ) सः अन्यस्मिन् जन्मनि शृगालः अभवत्।

(ज) कश्चिद् धर्मात्मा शृगालः व्याघ्राय सत्यं निवेदितवान्।

(झ) धूर्तैः पूर्वभृत्यैः व्याघ्रस्य भोजनार्थं मांसं चोरयित्वा शृगालस्य गृहे स्थापितम्।

2. अधोलिखितवाक्यांशाः कस्य चारित्रिकं वैशिष्ट्यं प्रकटयन्ति?

| | |
|---|---|
| (क) पश्चात्तापेन हिंसावृत्तिम् त्यजति। | व्याघ्रस्य / शृगालस्य |
| (ख) अतीव बुद्धिमान्। | व्याघ्रस्य / शृगालस्य |
| (ग) अमात्यानां नियुक्तिकृते विवेकशीलः। | व्याघ्रस्य / शृगालस्य |
| (घ) सहसा आवेशेन निर्णयं करोति। | व्याघ्रस्य / शृगालस्य |
| (ङ) पदस्य लोभः नास्ति। | शृगालस्य / व्याघ्रस्य |
| (च) उत्तमप्रशासकः आसीत्। | शृगालः / व्याघ्रः |
| (छ) पूर्वकर्मणा दूषितः। | शृगालः / व्याघ्रः |

3. अधोलिखितकर्तृवाच्यान्तवाक्यानां समक्षं कर्मवाच्यान्तं रूपम् लिखत–

(क) मृगराजः आज्ञप्तवान्।

(ख) चौरं पश्यत।

(ग) त्वम् कपटपूर्णवचनानि न गृह्णीयाः।

(घ) नृपः व्याघ्रः शृगालं मोक्षितवान्।

(ङ) सः धर्मात्मा आख्यातवान्।

4. पूर्णवाक्येन उत्तरं ददतु

(क) पूर्वभृत्याः किमर्थं शृगालाय प्राद्विषन्?

(ख) शृगालः किमर्थं वैराग्यं प्राप्तवान्?

(ग) पौरिकः नृपः किमर्थं शृगालयोनिं प्राप्तवान्?

(घ) व्याघ्रः शृगालं किमर्थं सचिवपदे नियुक्तम् अकरोत्?

(ङ) दुष्टैः शृगालैः किं कृतम्?

(च) संसारे कीदृशाः जनाः विरलाः भवन्ति?

(छ) शार्दूलः अविवेकी आसीत् इति कथं सिध्यति?

5. समस्तपदनिर्माणं कृत्वा लिखन्तु

(क) रोषेण सह विद्यमानः = ........................................

(ख) शार्दूलस्य जननी = ........................................

(ग) परेषां हिंसा = ........................................

(घ) सर्वेषु भूतेषु = ........................................

(ङ) सत्या वाक् यस्य सः = ........................................

(च) गोमायुना यन्त्रिताः = ........................................

(छ) पुरुषेषु अधमः = ........................................

(ज) कालम् अपि अनतिक्रम्य = ........................................

6. अधोलिखितवाक्येषु अव्ययपदानि योजयन्तु

(क) पुरिकायां पुरि .................................... पौरिकः नृपः अभवत्।

(ख) पूर्वभृत्याः परद्रव्याणि हरन्तः ..................... अशक्ताः अभवन्?

(ग) व्याघ्रः गोमायुचापलं श्रुत्वा ................... गोमायोः वधाय आदिशत्।

(घ) यः .......................... शुचिं परदोषैः दूषितं गृह्णाति, सः शीघ्रम् एव नश्यति।

(ङ) सः धर्मात्मा व्याघ्रम् उक्तवान् ....................... दुष्टैः कपटं कृतम्।

(च) दूषितामात्यः राजा .................... एव विनश्यति।

## 16.7 उत्तराणि

**16.3 बोधप्रश्नाः**

1. क + 4, ख + 1, ग + 5, घ + 2, ङ + 6, च + 3
2. क + 4, ख + 3, ग + 1, घ + 6, ङ + 2, च + 5
3. क. पुरिकायाम्, ख. पतितानि, ग. सचिवपदम्, घ. ईप्सितम् अन्नम्, ङ नगरं

**पाठगतप्रश्नाः**

**16.1** 1. (क) पूर्वभूतिम्, (ख) श्रीमती, (ग) दुष्कर्मभिः, (घ) व्याघ्रः, (ङ) सुदृढं व्रतम्, (च) किंचिदादातुम् अशक्याः।

2. (क) iii (ख) ii (ग) ii (घ) i

3. (क) परहिंसारतः, क्रूरः,(ख) शुचिः, पण्डितः, (ग) ख्यातविक्रमः, (घ) पुरा, च, अपि, यथाकालम्, मत्वा

**16.2** 1. (क) शृगालेन, (ख) मांसम्, (ग) सरोषः, (घ) शृगालस्य, (ङ) हितैः

2. (क) गोमायुयन्त्रिताः (ख) मृगराजेन (ग) सरोषः (घ) गोमायुचापलम् (ङ) शार्दूलजननी (च) कपटारम्भसंयुतम्

3. (क) मृगराजेन आज्ञप्तम् (ख) चौरः दृश्यताम् (ग) कृतकैः मृगेन्द्राय उपवर्णितम्

**16.3** 1. (क) व्याघ्रस्य माता (ख) शत्रुसमूहात् कोऽपि धर्मात्मा शृगालः (ग) व्याघ्रः शृगालं सत्कृत्य विमोक्षितवान् (घ) भिन्ना (ङ) भावस्निग्धा

2. (क) आख्यातवान् (ख) परिष्वक्तवान् (ग) अवदत् (घ) भवति (ङ) भवन्ति

3. (क) + 3, (ख) + 6 (ग) + 1, (घ) + 7, (ङ) + 2, (च) + 4, (छ) + 5

**16.6 पाठान्तप्रश्नाः**

1. (ग), (छ), (ख), (घ), (क), (झ), (ङ), (ज), (च)

2. (क) शृगालस्य (ख) शृगालस्य (ग) व्याघ्रस्य (घ) व्याघ्रस्य
   (ङ) शृगालस्य (च) शृगालः (छ) शृगालः

3. (क) मृगराजेन आज्ञप्तम् (ख) चौरः दृश्यताम् (ग) त्वया कपटपूर्णवचनानि न ग्रहीतव्यानि (घ) नृपेण व्याघ्रेण शृगालः मोक्षितः (ङ) तेन धर्मात्मना आख्यातम्।

4. (क) पूर्वभृत्याः शृगालं स्वकर्मसु पूज्यमानं दृष्ट्वा प्राद्विषन्।
   (ख) पूर्वजन्मनः कर्माणि स्मृत्वा शृगालः वैराग्यं प्राप्तवान्।
   (ग) पौरिकः नृपः परहिंसारतिः क्रूरः च अभवत्।
   (घ) शुचिं पण्डितं मत्वा शार्दूलः तम् सचिवपदे अवरयत्।
   (ङ) दुष्टैः शृगालैः सिंहस्य सिद्धं मांसं चोरयित्वा शृगालस्य गृहे न्यस्तम्।
   (च) हितैः जनाः विरलाः भवन्ति।
   (छ) शार्दूलः अविचार्य एव शृगालस्य वधम् आदिष्टवान्।

5. (क) सरोषः (ख) शार्दूलजननी (ग) परहिंसा (घ) सर्वभूतेषु
   (ङ) सत्यवाक् (च) गोमायुयन्त्रिताः (छ) पुरुषाधमः (ज) यथाकालम्

6. (क) पुरा (ख) हि (ग) तु (घ) अन्यथा
   (ङ) यथा (च) क्षिप्रमेव